# नारद भक्ति सूत्रम्

## प्रथमोऽध्यायः

### परभक्तिस्वरूपम्

1 01 अथातो भक्तिं व्याख्यास्यामः ।१
1 02 सा त्वस्मिन् परप्रेमरूपा ।२
1 03 अमृतस्वरूपा च ।३
1 04 यल्लब्ध्वा पुमान् सिध्दो भवति अमृतो भवति तृप्तो भवति ।४
1 05 यत्प्राप्य न किञ्चिद् वाञ्छति न शोचति न द्वेष्टि न रमते नोत्साही भवति ।५
1 06 यज्ज्ञात्वा मत्तो भवति स्तब्धो भवति आत्मारामो भवति ।६
1 07 सा न कामयमाना निरोधरूपत्वात् ।७
1 08 निरोधस्तु लोकवेदव्यापारन्यासः ।८
1 09 तस्मिन्ननन्यता तद्विरोधिषूदासीनता च ।९
1 10 अन्याश्रयाणां त्यागोनन्यता ।१०
1 11 लोकवेदेषु तदनुकूलाचरणं तद्विरोधिषूदासीनता ।११
1 12 भवतु निश्चयदार्ढ्यादूर्ध्वं शास्त्ररक्षणम् ।१२
1 13 अन्यथा पातित्यशङ्कया ।१३
1 14 लोकोऽपि तावदेव भोजनादि व्यापारस्त्वाशरीरधारणावधि ।१४
1 15 तल्लक्षणानि वाच्यन्ते नानामतभेदात् ।१५
1 16 पूजादिष्वनुराग इति पाराशर्यः ।१६
1 17 कथादिष्विति गर्गः ।१७
1 18 आत्मरत्यविरोधेनेति शाण्डिल्यः ।१८
1 19 नारदस्तु तदर्पिताखिलाचारता तद्विस्मरणे परमव्याकुलतेति ।१९
1 20 अस्त्येवमेवम् ।२०
1 21 यथा व्रजगोपिकानाम् ।२१
1 22 तत्रापि न माहात्म्यज्ञानविस्मृत्यपवादः ।२२
1 23 तद्विहीनं जाराणामिव ।२३
1 24 नास्त्येव तस्मिन् तत्सुखसुखित्वम् ।२४

## द्वितीयोऽध्यायः

### परभक्तिमहत्त्वम्

2 01 सा तु कर्मज्ञानयोगेभ्योऽप्यधिकतरा ।२५
2 02 फलरूपत्त्वात् ।२६
2 03 ईश्वरस्याप्यभिमानद्वेषित्वात् दैन्यप्रियत्वात् च ।२७
2 04 तस्याः ज्ञानमेव साधनमित्येके ।२८

2 05 अन्योन्याश्रयत्वमित्यन्ये ।२९

2 06 स्वयं फलरूपतेति ब्रह्मकुमारः ।३०

2 07 राजगृहभोजनादिषु तथैव दृष्टत्वात् ।३१

2 08 न तेन राजा परितोषः क्षुच्छान्तिर्वा ।३२

2 09 तस्मात् सैव ग्राह्या मुमुक्षुभिः ।३३

# तृतीयोऽध्यायः

## भक्तिसाधनानि

3 01 तस्याः साधनानि गायन्त्याचार्याः ।३४

3 02 तत्तु विषयत्यागात् सङ्गत्यागात् च ।३५

3 03 अव्यावृत्तभजनात् ।३६

3 04 लोकेऽपि भगवद्गुणश्रवणकीर्तनात् ।३७

3 05 मुख्यतस्तु महत्कृपयैव भगवत्कृपालेशाद् वा ।३८

3 06 महत्सङ्गस्तु दुर्लभोऽगम्योऽमोघश्च ।३९

3 07 लभ्यतेऽपि तत्कृपयैव ।४०

3 08 तस्मिंस्तज्जने भेदाभावात् ।४१

3 09 तदेव साध्यतां तदेव साध्यताम् ।४२

3 10 दुस्सङ्गः सर्वथैव त्याज्यः ।४३

3 11 कामक्रोधमोहस्मृतिभ्रंशबुध्दिनाशकारणत्वात् ।४४

3 12 तरङ्गायिता अपीमे सङ्गात् समुत्रायन्ते ।४५

3 13 कस्तरति कस्तरति मायाम् यः सङ्गं त्यजति यो महानुभावं सेवते निर्ममो भवति ।४६

3 14 यो विविक्तस्थानं सेवते यो लोकबन्धमुन्मूलयति निस्त्रैगुण्यो भवति योगक्षेमं त्यजति ।४७

3 15 यः कर्मफलं त्यजति कर्माणि सन्न्यस्स्यति ततो निर्द्वन्द्वो भवति ।४८

3 16 यो वेदानपि सन्न्यस्यति केवलमविच्छिन्नानुरागं लभते ।४९

3 17 स तरति स तरति स लोकांस्तारयति ।५०

# चतुर्थोऽध्यायः

## प्रेमनिर्वचनम्

4 01 अनिर्वचनीयं प्रेमस्वरूपम् ।५१

4 02 मूकास्वादनवत् ।५२

4 03 प्रकाशते क्वापि पात्रे ।५३

4 04 गुणरहितं कामनारहितं प्रतिक्षणवर्धमानं अविच्छिन्नं सूक्ष्मतरं अनुभवरूपम् ।५४

4 05 तत्प्राप्य तदेवावलोकति तदेव शृणोति तदेव भाषयति तदेव चिन्तयति ।५५

4 06 गौणी त्रिधा गुणभेदाद् आर्तादिभेदाद् वा ।५६

4 07 उत्तरस्मादुत्तरस्मात् पूर्व पूर्वा श्रेयाय भवति ।५७

4 08 अन्य मात् सौलभं भक्तौ ।५८

4 09 प्रमाणान्तरस्यानपेक्षत्वात् स्वयं प्रमाणत्वात् ।५९

4 10 शान्तिरूपात् परमानन्दरूपाच्च । ६०

4 11 लोकहानौ चिन्ता न कार्या निवेदितात्मलोकवेदत्वात् । ६१

4 12 न तत्सिध्दौ लोकव्यवहरओ हेयः किन्तु फलत्यागः तत्साधनं च । ६२

4 13 स्त्रीधननास्तिकचरित्रं न श्रवणीयम् । ६३

4 14 अभिमानदम्भादिकं त्याज्यम् । ६४

4 15 तदर्पिताखिलाचारः सन् कामक्रोधाभिमानादिकं तस्मिन्नेव करणीयम् । ६५

4 16 त्रिरूपभङ्गपूर्वकम् नित्यदास्यनित्यकान्ताभजनात्मकं प्रेम कार्यं प्रेमैव कार्यम् । ६६

# पञ्चमोऽध्यायः

## मुख्यभक्तिमहिमा

5 01 भक्ता एकान्तिनो मुख्याः । ६७

5 02 कण्ठावरोधरोमञ्चाश्रुभिः परस्परं लपमानाः पावयन्ति कुलानि पृथिवीं च । ६८

5 03 तीर्थीकुर्वन्ति तीर्थानि सुकर्मी कुर्वन्ति कर्माणि सच्छास्त्रीकुर्वन्ति शास्त्राणि । ६९

5 04 तन्मयाः । ७०

5 05 मोदन्ते पितरो नृत्यन्ति देवतः सनाथा चेयं भूर्भवति । ७१

5 06 नास्ति तेषु जातिविद्यारूपकुलधनक्रियादि भेदः । ७२

5 07 यतस्तदीयाः । ७३

5 08 वादो नावलम्ब्यः । ७४

5 09 बाहुल्यावकाशत्वाद् अनियतत्त्वाच्च । ७५

5 19 भक्तिशस्त्राणि मननीयानि तदुद्बोधकर्माणि करणीयानि । ७६

5 11 सुखदुःखेच्छालाभादित्यक्ते प्रतीक्ष्यमाणे क्षणार्धमपि व्यर्थं न नेयम् । ७७

5 12 अहिंसासत्यशौचदयास्तिक्यादिचारित्रयाणि परिपालनीयानि । ७८

5 13 सर्वदा सर्वभावेन निश्चिन्तैः भगवानेव भजनीयः । ७९

5 14 स कीर्त्यमानः शीघ्रमेवाविर्भवत्यनुभावयति भक्तान् । ८०

5 15 त्रिसत्यस्य भक्तिरेव गरीयसी भक्तिरेव गरीयसी । ८१

5 16 गुणमाहात्म्यासक्ति-रूपासक्ति-पूजासक्ति-स्मरणासक्ति-दास्यासक्ति-सख्यासक्ति-वात्सल्यसक्ति-कान्तासक्ति-आत्मनिवेदनासक्ति-तन्मयतासक्ति-परमविरहासक्ति-रूपा एकधा अपि एकादशधा भवति । ८२

5 17 इत्येवं वदन्ति जनजल्पनिर्भयाः एकमतः कुमार-व्यास-शुक-शाण्डिल्य-गर्ग-विष्णु-कौण्डिन्य-शेषोध्दवारुणि-बलि-हनुमद्-विभीषणादयो भक्त्याचार्याः । ८३

5 18 य इदं नारदप्रोक्तं शिवानुशासनं विश्वसिति श्रध्दते स भक्तिमान् भवति सः प्रेष्टं लभते सः प्रेष्टं लभते । ८४

---

Please send corrections to Sunder Hattangadi (sunderh@hot(ail.co()
Last updated on February 9, 1998